CC-0. Digitized by eGangotri and MIDF- Delhi

❀ अथ ❀

हरितालिका व्रतकथा विधि

बाबू माधवप्रसाद शर्मा

वाराणसी-१

सं० २०२३] [मूल्य २० पैसा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हरितालिका व्रत कथा

अथ हरितालिकापूजा ॥ भाद्रपदशुक्लतृतीयां प्रातस्तिलामलककल्केन स्नात्वा पट्टवस्त्रं परिधाय, मासपक्षाद्युल्लिख्य मम समस्तपापक्षयपूर्वकं सप्त-जन्म राज्याखण्डितसौभाग्यादिविवृद्धये उमामहेश्वरप्रीत्यर्थं हरितालिकाव्रतमहं करिष्ये। इति संकल्पं कृत्वा व्रतं चरेत्, ततः सायंकाले दन्तधावनपूर्वकं नद्यां तडागे कूपे वा यथाविधि स्नात्वा शुभ्रवस्त्रं परिधाय पूजास्थानमागत्य कदली-स्तंभध्वजतोरणादिभिर्मण्डपं मण्डयित्वा आसने उपविश्यैशान्याभिमुखो भूत्वा बालुकामयं गौरीसहितशिवलिङ्गं निर्माय स्वगृह्योक्तविधिना प्राणप्रतिष्ठादिकं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कृत्वा पूजासंकल्पं कुर्यात् ॥ तद्यथा—ॐ पूर्वसंकल्पसिद्धिरस्तु, मम सकल-जन्मजन्मनि संचितान्यनेकमहापातकोपपातकनिरसनपूर्वकमस्मिन्लोके समस्त श्रियाभिर्जुष्टनानाविधैश्वर्यसुखप्राप्तिपूर्वकमुभयस्वर्णविमानाधिरोहणउर्वश्यादिदेवाङ्गनाभिः सह नन्दनवनोद्यानविहरणाद्यनेकस्वर्गभोगकामस्तदुत्तरशिवसायुज्यप्राप्तिकाम आदौ दीपकलशगणेशपूजनपूर्वकं यथामिलितोपचारैः उमामहेश्वरपूजनमहं करिष्ये ॥ ततो दीपकलशगणेशपूजनं कुर्यात् ॥ ततो ध्यानम्—ॐ मन्दारमालाकुलितालकायै कपालमालांकितशेखराय ॥ दिव्याम्बरायै च दिगम्बराय नमः शिवायै च नमः शिवाय ॥ ॐ उमामहेश्वराभ्यां नमः ॥ आवाहनम्—ॐ देवदेव समागच्छ प्रार्थयेऽहं जगन्मय ॥ इमां मया कृतां पूजां गृहाण सुरसत्तम ॥ ॐ उमामहेश्वराभ्यां० ॥ आसनम्—ॐ हर शम्भो महादेव विश्वेशामरवल्लभ ॥ अनेकरत्न संयुक्तमासनं प्रतिगृह्यताम् ॥ ॐ

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उमामहेश्वराभ्यां० ॥ पाद्यम्—ॐजलं सुशीतलं चारु नानागंधसमन्वितम् ॥ पाद्यं गृहाण देवेश महादेव नमोस्तु ते ॥ ॐ उमामहेश्वराभ्यां० ॥ अर्घ्यम्—ॐ गङ्गाजलं समानीतं सुवर्णकलशे स्थितम् ॥ आचम्यतां महाभाग उमया सहितोऽनघ ॥ ॐ उमामहेश्वराभ्यां० ॥ स्नानम्—गङ्गासरस्वती रेवा पयोष्णी नर्मदा जलैः ॥ स्नापितोऽसि मया देव तथा शान्ति कुरुष्व मे ॥ ॐ उमा-महेश्वराभ्यां० ॥ पञ्चामृतम्—ॐ पयोदधिघृतं चैव शर्करामधुसंयुतम् ॥ पञ्चामृतेन स्नपितं प्रीत्यर्थं प्रतिगृह्यताम् ॥ ॐ उमामहेश्वराभ्यां० ॥ पुनः स्नानम्—ॐ किरणा धूतपापा च पुण्यतोया सरस्वती ॥ मणिकर्णिजलं शुद्धं स्नानार्थं प्रतिगृह्यताम् ॥ ॐ उमामहेश्वराभ्याँ० ॥ वस्त्रम्—ॐ सर्वभूषाधिके सौम्ये लोकलज्जानिवारणे ॥ मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम् ॥ ॐ उमामहेश्वराभ्यां० ॥ यज्ञोपवीतम्—ॐ सुवर्णतन्तुग्रथितं कार्तस्वरविभूषि-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तम् ॥ यज्ञोपवीतं देवेश गृहाण जगदीश्वर ॥ ॐ उमामहेश्वराभ्यां० ॥ गन्धम्—ॐ कुंकुमागरुकस्तूरी चन्दनं घनमिश्रितम् ॥ विलेपनं महादेव गन्धं दास्यामि भक्तितः ॥ ॐ उमामहेश्वराभ्यां० ॥ अक्षतान्—ॐ रञ्जिताः कुंकुमौघेन अक्षताश्चातिशोभनाः ॥ भक्त्या समर्पितास्तुभ्यं प्रसन्नो भव शङ्कर ॥ ॐ उमामहेश्वराभ्यां० ॥ उमायै—कंचुक्यादिसौभाग्यद्रव्यं समर्पयेत् ॥ यथा— ॐ कंचुकीमुपवस्त्रं च नानारत्नैः समन्वितम् ॥ गृहाण त्वं मया दत्तं पार्वती च नमोऽस्तु ते ॥ ॐ उमायै नमः ॥ सौभाग्यद्रव्याणि—ॐ हरिद्रां कुंकुमं चैव सिन्दूरं कज्जलान्वितम् । सौभाग्यद्रव्यसंयुक्तं गृहाण जगदीश्वरि ॥ ॐ उमायै नमः ॥ पुष्पम्—ॐ सेवन्तिकाबकुलचंपकपाटलाब्जैः पुन्नागजातिकरवीररसालद्रोणैः ॥ बिल्वप्रवालतुलसीदलमालतीभिस्त्वां पूजयामि जगदीश्वर मे प्रसीद ॥ ॐ उमामहेश्वराभ्यां० ॥ अथाङ्गपूजा—ॐ शंकराय नमः जंघे

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पू० ॥ ॐ शंभवे नमः जानुनीं पू० ॥ ॐ भूतेशाय० उरूं पू० ॥ ॐ नील-लोहिताय० कटिं पू० ॥ ॐ उग्राय० नाभिं पू० ॥ ॐ कृशानुरेतसे० उदरं पू० ॥ ॐ हराय नमः स्तनौ पू० ॥ ॐ नीलकण्ठाय० कण्ठं पू० ॥ ॐ शिवाय० मुखं पू० ॥ ॐ त्रिनेत्राय० नेत्रे पूज० ॥ ॐ रुद्राय नमः कर्णौ पू० ॥ ॐ ललाटाक्षाय० ललाटं पू० ॥ ॐ शर्वाय० शिरः पू० ॥ अथ धूपम्—ॐ वनस्पतिरसोद्भूतः कृष्णागरुसमन्वितः ॥ आनीतोऽयं मया धूपो गृहाण परमेश्वर ॥ ॐ उमामहेश्वराभ्यां० ॥ दीपम्—ॐ त्वं ज्योतिः सर्व-देवानां तेजसां तेज उत्तमम् ॥ आत्मज्योतिः परं धाम दीपोऽयं प्रतिगृह्यताम् ॥ ॐ उमामहेश्वराभ्यां० ॥ नैवेद्यम्—ॐ अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितम् ॥ भक्ष्यभोज्यसमायुक्तं नैवेद्यं प्रतिगृह्यताम् ॥ ॐ उमा महेश्वरा-भ्यां० ॥ आचमनीयम्–ॐ मलयाचलसंभूतं कर्पूरेण समन्वितम् ॥ आच-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

म्यतां जलं स्वच्छं प्रसन्नो भव सर्वदा ॥ ॐ उमामहेश्वराभ्यां० ॥ करोद्वर्तनं समर्पयामि ॥ ॐ उमामहेश्वराभ्यां नमः इतिकरोद्वर्तनम् ॥ फलम्—ॐ इदं फलं मया देव स्थापितं पुरस्तस्तव ॥ तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥ ॐ उमामहेश्वराभ्यां० ॥ ताम्बूलम्—ॐ पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् ॥ एलाचूर्णादिसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥ ॐ उमामहेश्वराभ्यां० ॥ दक्षिणा—ॐ हिरण्य गर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥ ॐ उमामहेश्वराभ्यां० भूषणम्—ॐ वज्रमाणिक्यवैदूर्यमुक्ताविद्रुममण्डितम् ॥ पुष्परागसमायुक्तं भूषणं प्रतिगृह्यताम् ॥ ॐ उमामहेश्वराभ्यां० ॥ नीराजनम्—ॐचन्द्रादित्यौ च धरणी विद्युदग्निस्त्वमेव च ॥ त्वमेव सर्वज्योतींषि आर्तिक्यं प्रतिगृह्यताम् ॥ अथ नामपूजा—ॐ उमायै नमः ॥ ॐ गौर्यै० ॥ ॐ पार्वत्यै० ॥ ॐ जगद्धात्र्यै० ॥ ॐ महेश्वराय० ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

Digitized by eGangotri and MIDF - Delhi

ॐ शान्तिरूपिण्यै० ॥ ॐ हराय नमः ॥ ॐ महेश्वराय नमः ॥ ॐ शंभवे०॥ ॐ शूलपाणये० ॥ ॐ पिनाकभृषे० ॥ ॐ शिवाय० ॥ ॐ पशुपतये० ॥ ॐ महादेवाय० ॥ पुष्पाञ्जलिः—ॐ मन्दारमालाकुलितालकायै कपालमालांकितशेखराय ॥ दिव्याम्बरायै च दिगम्बराय नमः शिवायै च नमः शिवाय । ॐ उमामहेश्वराभ्यां० ॥ प्रदक्षिणा—ॐ यानिकानि च पापानि ब्रह्महत्यासमानि च ॥ तानितानि विनश्यन्तु प्रदक्षिणपदे पदे ॥ ॐ उमामहेश्वराभ्यां० ॥ नमस्कारः—ॐ अन्यथा शरणं नास्ति त्वमेव शरणं मम ॥ तस्मात्कारुण्यभावेन रक्ष मां त्रिदशेश्वर ॥ ॐ उमामहेश्वराभ्यां०॥ प्रार्थना—ॐ पुत्रान् देहि धनं देहि सौभाग्यं देहि सुव्रते ॥ अन्यांश्च सर्वकामांश्च देहि देव नमोस्तु ते ॥ ॐ उमामहेश्वराभ्यां० ॥ ततो वायनानि ब्राह्मणाय दद्यात् ॥ ॐ अन्नं सुवर्णपात्रस्थं सवस्त्रफलदक्षिणम् । वायनं गौरि विप्राय ददामि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रीतये तव ॥ सौभाग्यारोग्यकामाय सर्वसंपत्समृद्धये ॥ गौरीगौरीशतुष्टयर्थं वायनं ते ददाम्यहम् ॥ ॐ उमामहेश्वराभ्यां० ॥ ततोऽर्धरात्रे षोडशोपचारेण पुनः पूर्ववत् पूजां कुर्यात् ॥ अनेकनानाविधकौतुकनृत्यगीतकथाश्रवणगौरी-शिवनामकीर्तनादिभिः जागरणं कृत्वा प्रातः स्वगृह्योक्तविधिना विसर्जयेत् ॥

॥ इति पूजाविधिः ॥

कथा प्रारम्भः

मन्दारमालाकुलितालकायै कपालमालाङ्कितशेखराय ॥
दिव्याम्बरायै च दिगम्बराय नमः शिवायै च नमः शिवाय ॥१॥

एकदिन कोही कालमा नैमिषारण्य क्षेत्रमा शौनकादि ८८ हजार ऋषि-हरूले प्रश्न गरिएका सूतनामा पौराणिक जो छन् सो पैल्हे (मन्दारमाला-कुलितालकाय) भन्ने यो मङ्गलाचरण भनेर शिवपार्वतीलाई नमस्कार गरेर

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

कालितालकाय ॥ भन्न मा मङ्गलचरण मन्त्र शिवपार्वतीलाई नमस्कार गरेर
CC-0. Digitized by eGangotri and MIDF- Delhi

भन्दछन् ॥ मन्दार पुष्पका मालाले दबेको छ अलक जसका यस्ती पार्वती औ कपाल अर्थात् मुण्डमालाले शोभायमान छ शेखर अर्थात् मस्तक जसको यस्ता शिवजी, त्यस्तै फेरि दिव्याम्बरा अर्थात् दिव्य पोशाकले भूषित भएकी पार्वती त्यस्तै फेरि दिगम्बर अर्थात् दिशै छ वस्त्र जसका यस्ता अर्थात् नाङ्गा

कैलासशिखरे रम्ये गौरी पृच्छति शङ्करम् ॥
गुह्याद् गुह्यतरं गुह्यं कथयस्व महेश्वर ॥२॥
सर्वेषां धर्म सर्वस्वमल्पायासान्महत् फलम् ॥
प्रसन्नोऽसि यदा नाथ तथ्यं ब्रूहि ममाग्रतः ॥३॥

शिव-पार्वतीलाई नमस्कार छ ॥ १॥ रमणीय अर्थात् सुन्दर यस्तो जो कैलाश पर्वत तेसको जो शिखर तेसमा बसेका यस्ता शंकरका हजूरमा गौरी विन्ति गर्दछिन्, हे शंकर ! गुप्तमा पनि अत्यन्त गुप्त व्रत मलाई आज्ञा गर्नुहवस्

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥२॥ हे स्वामिन् ! यदि हजूर प्रसन्न होइबक्सिन्छ भने संपूर्ण धर्मको थोरै परिश्रमले ठूलो फल दिने यस्तो व्रत मेरो अगाडि आज्ञा गर्नुहवस् ॥३॥ औ कुन दान व्रत धर्म गर्नाले आदि मध्य अन्त्य नभएका संपूर्ण जगत्का

केन त्वं हि मया प्राप्तस्तपोदानव्रतादिना ॥
अनादिमध्यनिधनो भर्त्ता चैव जगत्प्रभुः ॥४॥

ईश्वर उवाच

शृणु देवि प्रवक्ष्यामि तवाग्रे व्रतमुत्तमम् ॥
यद्गोप्यं मम सर्वस्वं कथयामि तव प्रिये ॥५॥

स्वामी भएका हजुरजस्ता भर्त्ता मैले पाएँ ॥४॥ पार्वतीको यस्तो बिन्ती सुनेर भगवान् आज्ञा गर्नुहुन्छ । हे देवि ! तिम्रा अगाडि अतीव गुप्त व्रत कहन्छु सुन ॥५॥ कस्तो व्रत भने जस्तै नक्षत्रमा चन्द्रमा बड़ा छन्, ग्रहहरूमा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जस्तै सूर्य बड़ा छन्, जस्तै वर्ण अर्थात् ब्राह्मण, क्षत्रिय, वैश्य, शूद्र चार वर्णमा ब्राह्मण उत्तम छन्, देवताहरूमा जस्तै विष्णु बड़ा छन् ॥६॥ नदीहरूमा जस्तै गंगा बड़ी छन्, पुराणहरूमा जस्तै भारत बड़ो छ, वेदहरूमा

यथा चोडुगणे चन्द्रो ग्रहाणां भानुरेव च ॥
वर्णानां च यथा विप्रो देवानां विष्णुरुत्तमः ॥६॥
नदीषु च यथा गङ्गा पुराणानां तु भारतम् ॥
वेदानां च यथा साम इन्द्रियाणां मनो यथा ॥७॥

जस्तै सामवेद बड़ो छ, इन्द्रियहरूमा जस्तै मन बड़ो छ ॥७॥ त्यस्तै यी वेदपुराणहरूको सर्वस्व भएको वेदले कहिएको पुरानु यो व्रत एकाग्र मनले सुन ॥८॥ जुन व्रतको पुण्यका प्रभावले तिमीले मेरो अर्द्धासन पायौ त्यो

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संपूर्ण तिमीलाई भन्दछु; किनकि तिमी अत्यन्त प्यारी छौ ॥६॥ भाद्र मैन्हाका शुक्लपक्षको हस्ता नक्षत्र औ सोमवारले युक्त भएको तृतीयाको व्रतमात्रले

पुराणवेदसर्वस्वं आगमेन यथोदितम् ॥
एकाग्रेण शृणुष्वैतत् यथादृष्टं पुरातनम् ॥८॥
येन पुण्यप्रभावेण प्राप्तमर्द्धासनं मम ॥
सर्वं तत्कथयिष्येऽहं त्वं मम प्रयसी यतः ॥९॥
भाद्रे मासि सिते पक्षे तृतीया हस्तसोमयुक् ॥
तदनुष्ठानमात्रेण सर्वपापैः प्रमुच्यते ॥१०॥

संपूर्ण पापदेखि मोक्ष हुन्छ (सर्वदा सोमवार पर्दैन, यदि सोमवार पर्‍यो भने अत्यन्त उत्तम जान्नु) ॥१०॥ हे देवि ! पैल्हे हिमालय पर्वतमा तिमीले जुन ठूलो व्रत गरिथ्यौ सो सम्पूर्ण वृत्तान्त सहित सुन ॥ ११ ॥ यस्तो

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भगवान शंकरको आज्ञा सुनेर पार्वती विन्ती गर्दछिन् । सम्पूर्ण व्रतहरूमा उत्तम यो व्रत मैले कस्ता प्रकारले गरें, हे महेश्वर ! यो सम्पूर्ण हजुरदेखि

श्रृणु देवि त्वया पूर्वं यद्व्रतं चरितं महत् ॥
तत्सर्वं कथयिष्यामि यथावृत्तं हिमाचले ॥११॥

पार्वत्युवाच

कथं कृतं मया नाथ व्रतानामुत्तमं व्रतम् ॥
तत्सर्वं श्रोतुमिच्छामि त्वत्सकाशान्महेश्वर ॥१२॥

सुन्नाको इच्छा गर्दछु, आज्ञा हवस् ॥१२॥ पार्वतीको यस्तो विन्ती सुनेर भगवान् शंकर आज्ञा गर्नुहुन्छ, हे देवि ! सुन म भन्दछु, नाना प्रकारका ऐश्वर्य वस्तुले युक्त औ नाना प्रकारका वृक्षहरूले युक्त भएको हिमवान नाउँ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गरेको तहाँ एक पर्वत थियो ॥१३॥ नानापक्षी र नानाप्रकारका मृगहरूले चित्र-विचित्र भएको औ जहाँ देवता सिद्ध चारण गंधर्व गुह्यक ॥१४॥

ईश्वर उवाच

आसीत्तत्र महादिव्यो हिमवान् नग उत्तमः ॥
नानाभूति समाकीर्णो नानाद्रुमसमाकुलः ॥१३॥
नाना पक्षिसमायुक्तो नाना मृगविचित्रितः ॥
यत्र देवाः सगन्धर्वाः सिद्धचारणगुह्यकाः ॥१४॥
विचरन्ति यथा देवि गन्धर्वध्वनिसङ्कुलम् ॥
स्फटिकैः काञ्चनैः शृङ्गैर्मणिवैदूर्यभूषितैः ॥१५॥

यथेच्छ विहार गर्दथे, जहाँ नित्य गन्धर्वहरूको नाचगान बजानको शब्द सुनिन्थ्यो औ मणिवैदूर्य आदि गरिएका रत्नहरूले भूषित स्फटिक सुवर्णका

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अनेक शृङ्ग अर्थात् टाकुरा ॥१५॥ फेरि ती टाकुरा कस्ता भने ऊँचामा हदका आकाश स्पर्श गर्छन् कि क्या भने जस्ता हिमले युक्त गंगाजोको पतन त्यसको जो शब्द त्यस शब्दले शब्दायमान यस्ता ती हिमालय पर्वतमा

भुजैर्लिखन्निवाकामं सुहृदो मन्दिरं यथा ॥
हिमेन सहितो नित्यं गङ्गाध्वनिविनादितः ॥१६॥
पार्वती त्वं तत्र बाल्ये परमं चाचरत्तपः ॥
अब्दद्वादशकं देवि धूमपानमधोमुखी ॥१७॥

॥१६॥ हेपार्वती ! तिमीले बालकै अवस्थामा अधोमुख भएर धूम्रपान गरेर १२ वर्ष तपस्या गऱ्यौ ॥१७॥ तहाँ उप्रान्त ६४ वर्षसंम पाकेका घाँस-पात खाएर तपस्या गऱ्यौ । तिम्रो यस्तो कष्ट देखेर तिम्रा बाबा जो छन् सो

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चिन्ताले अत्यन्त दुःखित भए ॥१८॥ यी कन्या म कसलाई दिऊँ भन्ने यस चिन्ताले आतुर भएर बसेका थिए । सोही बखतमा आकाशदेखि ब्रह्माका

संवत्सरचतुष्षष्टि पक्वपर्णाशनं कृतम् ॥
दृष्ट्वा तातेन तत्कष्टं चिन्तया दुःखितोऽभवत् ॥१८॥
कस्मै देया मया कन्या एवं चिन्तातुरोऽभवत् ॥
तदैवाम्बरतः प्राप्तो ब्रह्मपुत्रस्तु धर्मवित् ॥१९॥
नारदो मुनिशार्दूलः शैलपुत्रीं दिदृक्षया ॥
दत्वाऽर्घ्यं विष्टरं पाद्यं नारदायोक्तवान् गिरः ॥२०॥

छोरा संपूर्ण धर्म जान्ने ॥१९॥ नारद मुनि जो छन् सो पार्वतीको दर्शन गर्नाका निमित्त तहाँ प्राप्त भए। जब नारदलाई हिमालयले देखेथे झट्ट उठेर अर्घपाद्यहरूले

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पूजा गरी आसनमा बसाएर यो वचन बोल्द भए ॥ २० ॥ हे स्वामि हे मुनि सत्तम ! कुन कार्यले हजुर यहाँ पाल्नु भयो, आज्ञा हवस् । अहो ! आज हजूरजस्ता मेरो घरमा प्राप्त हुनु मेरो बड़ो भाग्यको दिन

शैल उवाच

किमर्थमागतः वामिन् वदस्व मुनिसत्तम ॥
महद्भाग्येन सम्प्राप्तं त्वदागमनमुत्तमम् ॥२१॥

नारद उवाच

शृणु शैलेन्द्र मद्वाक्यं विष्णुना प्रेषितोऽस्म्यहम् ॥
योग्यं योग्याय दातव्यं कन्यारत्नमिदं त्वया ॥२२॥

रहेछ ॥ २१ ॥ यस्तो हिमालय पर्वको वचन सुनी विष्णुले मलाई पठाउनु भएको हो, किन कि योग्य वस्तु जो हो योग्यै वस्तुमा जानु पर्दछ । तिम्री यी कन्या-रत्न विष्णुलाई दिनु योग्य छ ॥२२॥ किनि कि हेर वासुदेव तुल्य

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ब्रह्मा, शिव आदि गरिएका देवताहरू कोही छैनन् तसर्थ तिम्री छोरी विष्णुलाई देऊ, यसमा मेरो पनि संमति अथवा सल्लाह छ ॥ २३ ॥ यस्ता नारदका वचन सुनेर हिमालय भन्दछन्, स्वयं वासुदेव कन्या माग्नु हुन्छ र

वासुदेवसमो नास्ति ब्रह्माविष्णुशिवादिषु ॥
तस्मै देया त्वया कन्या अत्रार्थे सम्मतं मम ॥२३॥

गिरिरुवाच

वासुदेवः स्वयं देवः कन्यां प्रार्थयते यदि ॥
तदा मया प्रदातव्या त्वदागमनगौरवात् ॥२४॥

तपाईं जस्ता ऋषि कन्यार्थी भएर आउनु भयो भने तपाईं आउनाका प्रभावैले पनि कन्या विष्णुलाई दिनु पर्दछ । हुन्छ दिएँ ॥ २४ ॥ यस्ता

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हिमालयका वचन सुनेर उसै बखत नारद अन्तर्ध्यान भएर पीताम्बर धारण गरेका शंख, चक्र, गदा, पद्म धारण गरेका विष्णुका अगाड़ि गएर ॥ २५ ॥ हात जोरी यो विन्ती गर्दा भए। हजूरको कार्य सिद्ध भयो,

इत्येवं गदितं श्रुत्वा तस्य त्वन्तर्दधे मुनिः ॥
ययौ पीताम्बरधरं शङ्खपद्मगदाधरम् ॥२५॥
कृताञ्जलिपुटो भूत्वा मुनीन्द्रस्तमभाषत ॥

नारद उवाच

शृणु देव ! भवत्कार्यं विवाहो निश्चितस्तव ॥२६॥

हिमालयकी कन्या हजूरलाई दिए ॥ २६ ॥ यसतर्फ जब नारदजी गए थे तब हिमालयले यो वचन बोल्दा भए, हे पुत्रि ! तिमीलाई मैले विष्णुलाई

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दिएँ। तिम्रो विवाह विष्णुसँग हुन्छ ॥ २७ ॥ यस्ता आफ्ना बाबुको वचन सुनेर आफ्ना सखीहरूले सहित भएकी सिंह व्याघ्रादिहरूले सहित भएको वनमा गएर तिमी सुत्तिभयौ ॥ २८ ॥ तिमीलाई खेदले युक्त भई

हिमवांस्तु तदा गौरीमुवाच वचनं मुदा ॥
दत्तासि त्वं मया पुत्रि देवाय गरुडध्वजे ॥२७॥
श्रुत्वा वाक्यं पितुर्दैवी सखीभिः सहिता वने ॥
सिंहव्याघ्रमृगैर्व्याप्तैस्तत्र सुप्ता च निर्जने ॥२८॥

सुतेकी देखेर सखीले यो वचन बोली—हे देवि ! मेरो अगाडि भन, कुनकुन कारणले तिमी दुःखित भयौ ? जउन गर्नाले तिमी सुखी हुन्छयौ औ दुःख छुट्छ सो म अवश्य गरुँला, यसमा संदेह न

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मान ॥ २९ ॥ यस्ता ती आफ्नी सखीका वचन सुनेर तिमीले यो वचन बोल्यौ—हे सखि ! यस बखतमा मेरो मनोरथ सुन, श्रीमहादेव

सख्युवाच

किमर्थं दुःखिता देवि कथयस्व ममाग्रतः ॥
यत्ते भवत्यभिहितं करिष्येऽहं न संशयः ॥२९॥

पार्वत्युवाच

सखि प्रिये शृणुष्वाद्य मनोभिलषितं मम ॥
कपर्दिनं च भर्त्तारं करिष्येऽहं न संशयः ॥३०॥

पति गरुँला भन्ने मेरो मनमा निरन्तर यही थियो ॥ ३० ॥ त्यो मेरो मनोरथ आज मेरा बाबाले नाश गरी विष्णुलाई दिनुभो । यो बात मलाई प्रिय

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

छैन । तस्मात् हे प्रिये ! म देह त्याग गर्दछु ॥ ३१ ॥ यस्ता तिम्रा वचन सुनेर सखी बोल्दी भई——हे पार्वति ! तेसो भए तिम्रा बाबाले नजान्ने ठाउँमा जाउँ, पछि जसो होला । यस्तो सल्लाह गरेर ॥ ३२ ॥ ती सखीले

एतन्मे चिन्तितं कार्यं तातेन कृतमन्यथा ॥
तस्माद्देहपरित्यागं करिष्येऽहं सखि प्रिये ॥३१॥
पार्वत्या वचनं श्रुत्वा सखी वचनमब्रवीत् ॥
पिता यत्र न जानाति गमिष्यामो हि तद्वनम् ॥३२॥
इत्येवं सम्मतं कृत्वा नीतासि त्वं महद्वनम् ॥
पिता निरीक्षयामास हिमवांस्तु गृहे गृहे ॥३३॥

आकै ठूलो वनमा तिमीलाई लिएर जाँदी भइन् । जब तिमी तहाँबाट अन्यत्र गयौ, तिम्रा बाबाले तिमीलाई नदेख्ता घरमा खोज्न लागे ॥ ३३ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जब कहीं पनि पाइनौ तब विह्वल भएर हिंड्न लागे, मेरी छोरीलाई कसले ली गयो अथवा देव, गन्धर्व, किन्नरहरूले पो लगे कि कता गइन्, अब नारदसँग विष्णुलाई दिएँ भन्ने कबोल गरेको त्यो कबोल के दिएर

केन नीतासि मे पुत्री देवदानवकिन्नरैः ॥
नारदाय कृतं सत्यं किं दास्ये गरुडध्वजम् ॥३४॥
इत्येवं चिन्तयाविष्टो मूर्छितो निपपातह ॥
हाहाकृत्वा प्रधावन्ति लोकास्ते गिरिपुङ्गवम् ॥३५॥

पूरा गरुँ ॥ ३४ ॥ यस्ता प्रकारको चिन्तामा मग्न भएका छँदा मूर्च्छा भै पृथ्वीमा गिर्दा भए। जब हिमालय मूर्च्छा परेथे हाहाकार गरेर संपूर्ण जनहरू तिनका नजीकमा गएर ॥ ३५ ॥ बोल्दा भए कि हे पर्वतराज ! मूर्च्छा परेको अर्थ क्या हो ? यस्ता ती जनहरूको वचन सुनेर हिमालय

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भन्दछन्—मेरो दुःखको कारण सुन, मेरी कन्या-रत्नलाई कसले हरण गऱ्यो ॥ ३६ ॥ कालसर्पले डस्यो अथवा सिंहले खायो, कहाँ गइन् या कुन दुष्टले लग्यो, केही पत्ता छैन भनेर ॥ ३७ ॥ जस्ता हिसाबले हावाले

ऊचुर्गिरिवरं सर्वे मूर्च्छाहेतुं गिरे वद ॥
दुःखस्य हेतुं शृणुत कन्यारत्नं हतं मम ॥३६॥
दष्टा वा कालसर्पेण सिंहव्याघ्रेण वा हता ॥
न जाने क्व गता पुत्री केन दुष्टेन वा हता ॥३७॥
चकम्पे शोकसन्तप्तो वातेनैव महातरुः ॥
गिरिर्वनाद्वनं यातस्तदालोकनकारणात् ॥३८॥

रूख हल्लाउँछ तेस्तै हिसाबले शोकले काँप्दा छँदा ती हिमालय जो छन् सो तिमीलाई खोज्नाका निमित्त वन-वनमा जाँदा भए ॥ ३८ ॥ तिमी

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पनि सिंह, बाघ, भालु सर्पहरूले युक्त भएको अघोर जंगलमा सखीहरूले युक्त भएर हिंडदथ्यौ ॥ ३९ ॥ तहीं नदीका रमणीय किनारमा एक गुफा थियो, त्यो देखेर सखीले सहित भएकी अन्न औ भोगले रहित

सिंहव्याघ्रैश्च भल्लूकैरहिभिः सहितं वनम्॥
त्वं चापि विपिने घोरे व्रजन्तं सखिभिः सह ॥३९॥
तत्र दृष्ट्वा नदीं रम्यां तत्तीरे च महागुहाम् ॥
तां प्रविश्य सखीं सार्द्धमन्नभोगं विवर्जिता ॥४०॥
संस्थाप्य वालुकापिण्डं पार्वत्या सहितं मम ॥
या तृतीया भाद्रपदे हस्तनक्षत्रसंयुता ॥४१॥

भएकी छँदी गुफामा बसेर ॥ ४० ॥ तहाँ पार्वतीले सहित भएको मेरो बालुवाको लिङ्ग बनाई स्थापना गरेर भाद्र महा शुक्लपक्ष हस्त नक्षत्रले युक्त भएको तृतीयाका दिन व्रत गरेर सायंकालमा पूजा गऱ्यौ ॥ ४१ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तहाँ उप्रान्त नाना प्रकारको नाच, गान, बजान गरेर त्यो रात्रिभर जागरण गऱ्यौ, त्यस व्रतका प्रभावले मेरो आसन पनि डग्मगायो ॥ ४२ ॥ जहाँ सखीहरूले सहित भएर तिमी बसेकी थियौ तहाँ

तत्र वादित्रगीतेन रात्रौ जागरणं कृतम् ॥
तेन व्रतप्रभावेण आसनं चलितं मम ॥४२॥
सम्प्राप्तोऽहं तदा तत्र यत्र त्वं सखिभिः सह ॥
प्रसन्नोऽस्मि मया प्रोक्तं वरं ब्रूहि वरानने ॥४३॥

म आएँ। तिमीदेखि बहुत प्रसन्न भएँ ॥ ४३ ॥ तहाँ उप्रान्त तिमीले यस्ता प्रकारको वर माग्यौ कि, पार्वत्युवाच, हे देव ! यदि मदेखि प्रसन्न होई बक्सिन्छ भने हजूर मेरा पति होइबक्सनुहवस्, मलाई यही इच्छा छ ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तिम्रो यस्तो वचन सुनेर म कैलाशमा आएँ ॥ ४४ ॥ तहाँ उप्रान्त सम्पूर्ण पूजाको सरजाम नदीमा सेलाएर सखीहरूले सहित भएर व्रतको पारण तिमीले गर्दा भयौ ॥ ४५ ॥ त्यस व्रतको सांग्ये गरेर बसेकी मात्र थियौ,

यदि देव प्रसन्नोऽसि भर्त्ता भवतु मे हर ॥
तथेत्युक्त्वा तु तां देवीं कैलाशं पुनरागतः ॥४४॥
ततः प्रभाते सम्प्राप्ता नद्यां सर्वविवर्ज्जितम् ॥
पारणं तु कृतं यत्र सख्या सार्द्धं त्वया शुभम् ॥४५॥

तिमी हराउनाको जो शोक, तेसले व्याकुल भएका फिर्दै चारै दिशामा हेर्दै तिमीलाई खोज्दै ताहीं तिम्रा बाबु हिमालय पनि आइपुग्दा भए ॥ ४६ ॥ तहाँ आइपुगेर सोही नदीका किनारामा सखीले सहित भएर

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुतेकी तिमीलाई देखे। जब तिमीलाई देखेथे झट् तिमीलाई उठाई काखमा लिएर रुँदा भए ॥ ४७ ॥ तहाँ उभान्त तिमीदेखि रिसायर यो वचन बोले कि हे दुष्टे! सिंह व्याघ्र आदिले युक्त भएका बनमा कसरी

हिमवानपि तं देशमाजगाम घनं वनम् ॥
चतुराशां निरीक्षंस्तु विह्वलः पतितः पुनः ॥४६॥
दृष्ट्वा तत्र नदीतीरे प्रसुप्तं कन्यकाद्वयम् ॥
उत्थाप्योत्सङ्गमारोप्य रोदनं कृतावान् गिरिः ॥४७॥
सिंहव्याघ्रादिभल्लूकैर्वने दुष्टे कुतः स्थिता ॥४८॥

बसिस्, किन आइस् ॥ ४८ ॥ यस्ता आफ्ना पिताका वचन सुनेर तिमीले भन्यौ, हे तात! हे बाबा! सुन्नु हवस् जउन बात मेरो प्रसन्न

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

थिएन सो बात मलाई तपाईंले गर्नु भयो, के भने विष्णुलाई मलाई दिनु भयो । यही कारणले म बनमा आएकी हुँ ॥ ४९ ॥ हे तात ! अब पनि यदि महादेवलाई दिनुहुन्छ भने म घरजान्छु नत्र म अवश्य पनि जान्न,

पार्वत्युवाच

श्रृणु तात मया ज्ञातं त्वं दास्यसीश्वराय माम् ॥
तदन्यथा कृतं तात तेनाहं वनमागता ॥४९॥

ददासि तात यदि मां गिरीशाय तदा गृहम् ॥
आगमिष्यामि नैवं चेदिह स्थास्यामि निश्चितम् ॥५०॥

वनमै बस्तछु, जो होला ॥५०॥ यस्ता तिम्रा वचन सुनेर तिम्रा पिताले हुन्छ भनेर तिमीलाई घर लिएर जाँदा भए, तहाँ उप्रान्त मेरा साथ तिम्रो विवाह

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विधि विधान-पूर्वक गरिदिंदा भए ॥ ५१ ॥ हे पार्वती ! सोही व्रतका प्रभावले यत्रो सौभाग्यको साधना तिमीले गर्दिभयौ । यो व्रजराज संपूर्ण व्रतहरूको राजा भएको व्रत मैले कसैलाई पनि कहेको छैन ॥ ५२ ॥

तथेत्युक्त्वा हिमवता नीतासि त्वं गृहं प्रति ॥
पश्चाद्दत्ता त्वमस्माकं कृत्वा वैवाहिकां क्रियाम् ॥५१॥
तेन व्रत प्रभावेण सौभाग्यं साधितं त्वया ॥
अद्यापि व्रतराजस्तु नैकस्मापि निवेदितः ॥५२॥
नामस्य व्रतराजस्य शृणु देवि यथा भवेत् ॥
अलिभिर्हरिता यस्मादतः सा हरितालिका ॥५३॥

देवि ! यस व्रत-राजको नाउँ पनि तिमी सुन अलि अर्थात् सखीहरूले तिमीलाई हरण गरेर लगेको बखतमा तिमीले गरेको व्रत हुनाले

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हरितालिका भन्ने यस व्रतको नाउँ भयो ॥ ५३ ॥ सूतजी भन्नुहुन्छ— हे शौनकादि ऋषि हो ! यस्ता प्रकारको विस्तार महादेवदेखि सुनेर फेरि

पार्वत्युवाच

नामेदं कथितं तस्य विधिं वद मम प्रभो ॥
किं पुण्यं किं फलं चास्य केन च क्रियते व्रतम् ॥५४॥

ईश्वर उवाच

शृणु देवि ! व्रतं वक्ष्ये नारीणां व्रतमुत्तमम् ॥
करिष्यसि प्रयत्नेन यदि सौभाग्यमिच्छसि ॥५५॥

पार्वती विन्ती गर्दछिन्, हे प्रभो ! नाउँ ता कहनुभयो व्रतको विधि, पुण्य, यो व्रत गर्नाले पाइने फल औ कसले यो व्रत गऱ्यो सो आज्ञा हवस् ॥ ५४ ॥ यस्ता प्रकारको पार्वतीको विन्ती सुनेर महादेव आज्ञा गर्नुहुन्छ,

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हे देवि ! सुन यो व्रत नारी अर्थात् स्त्रीहरूको मुख्य व्रत हो, अवश्य गर्नुपर्दछ । यदि तिमी पनि निरन्तर सौभाग्यको इच्छा गछर्यौ भने अवश्य यो व्रत गर ॥ ५५॥ विधि सुन, चारौं तर्फ केराका स्तम्भ तोरणले वेष्टित

तोरणादिप्रकर्त्तव्यं कदलीस्तभमण्डितम् ॥
आच्छाद्य पट्टवस्त्रैस्तु नानावर्णविचित्रितैः ॥५६॥
चन्दनेन सुगन्धेन लेपयेद् गृहमण्डलम् ॥
शङ्खभेरीमृदङ्गैश्च कारयेद् बहुनिस्स्वनै ॥५७॥

गर्नू और नाना प्रकारका रङ्ग-बिरङ्गका पट्टवस्त्रहरूले छादन गर्नू ॥ ५६ ॥ सुगन्ध चन्दनहरूले त्यो मण्डल लेपन गर्नू औ शंख भेरी मृदङ्गहरू बजाउनू ॥ ५७ ॥ नाना प्रकारको मंगल गान पनि तहाँ गर्नू यस्ता प्रकारले

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मेरो घरमा अर्थात् त्यस मण्डपमा महोत्सव गरेर पार्वतीले सहित भएको बालुवाको मेरो लिंग बनाएर ॥ ५८ ॥ अनेक प्रकारको धेरै पुष्प नाना प्रकारको नैवेद्य, धूप, दीप, चन्दन, अक्षता इत्यादि प्रशस्त वस्तुले पूजा

नाना मङ्गलगीतैश्च कर्त्तव्यं मम सन्निधौ ॥
थापयेद् बालुकालिङ्गं पार्वत्या सहितं मम ॥५८॥
पूजयेद् बहुपुष्पैश्च गन्धधूपादिभिर्नवैः ॥
नाना प्रकारैर्नैवेद्यैः पूजयेत् जागरं चरेत् ॥५९॥

गरेर रात्रीभर जागरण गर्नू ॥ ५९ ॥ नरीवल, सुपारी, ज्यामीर, बकुल-पुष्प (हिन्दुस्तानी भाषामा मौल्सिर भन्दछन्), बिमिरो, नारङ्गी इत्यादि अनेक फलहरू प्रशस्त ॥ ६० ॥ यस्तै ऋतुकालमा भएका अनेक कन्द

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मूल, पुष्प औ धूप दीप चन्दन इत्यादि चढ़ाउने वस्तु जति छन् यस मन्त्रले चढ़ाउनू ॥ ६१ ॥ मन्त्र—नमः शिवायदेखि ६६ श्लोक संमका ५ मन्त्रले पूजा गर्नू । अर्थ—शिवाय नमः, शान्ताय नमः, पञ्चवक्त्राय नमः, शूलिने

नारिकेलैः पुङ्गफलैर्जम्बीरैर्वकुलैतथा ॥
बीजपूरैः सनारंगैः फलैश्चान्यैश्च भूरिशः ॥६०॥
धूपदीपैर्गन्धपुष्पैर्मन्त्रेणानेन पूजयेत् ॥६१॥
नमः शिवाय शान्ताय पञ्चवक्त्राय शूलिने ॥
नन्दिभृङ्गिमहाकालगणयुक्ताय शम्भवे ॥६२॥

नमः, नन्दि-भृङ्गि-महाकालगणयुक्ताय नमः ॥ ६२ ॥ शिवायै नमः, प्रकृत्यै नमः ॥ सृष्टिहेतवे नमः, शिवायै नमः, सर्वमाङ्गल्यै नमः, शिवरूपायै नमः,

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जगन्मयायै नमः ॥ ६३ ॥ यी मंत्रले पूजा गरेर फेरि यस मन्त्रले प्रार्थना गर्नू, हे शिवे ! (हे कल्याणदे) अर्थात् कल्याण दिने हे शिवरूपे !

शिवायै हरकान्तायै प्रकृत्यै सृष्टिहेतवे ॥
शिवायै सर्वमांगल्यै शिवरूपे जगन्मये ॥६३॥
शिवे कल्याणदे नित्यं शिवरूपे नमोऽस्तु ते ॥
शिवरूपे नमस्तुभ्यं शिवायै सततं नमः ॥६४॥

हजूरलाई बारम्बार नमस्कार छ ॥ ६४ ॥ ब्रह्मरूपिण्यै अर्थात् साक्षात् ब्रह्मरूप भएकी र जगतको पालना गर्ने यस्ती हजूरलाई निरन्तर नमस्कार छ ॥ ६५ ॥ हे सिंहवाहिनी ! संसारको भयरूपी जो सन्ताप छ त्यस-

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

देखि मेरो रक्षा गर्नु हवस्, हे देवेशी ! जुन कामनाले मैले हजूरको पूजा गरें हे महेश्वरी ! त्यो राज्यरूपी सौभाग्यसम्पत्ति हे अम्ब ! हे पार्वती ! मलाई बक्सनुहवस् ॥ ६६ ॥ हे देवी ! यस मन्त्रले मैले सहित तिम्रो

नमस्ते ब्रह्मरूपिण्यै जगद्धात्र्यै नमो नमः ॥
संसारभयसन्तापात् त्राहि मां सिंहवाहिनी ।६५॥
येन कामेन देवेशि पूजितासि महेश्वरि ॥
राज्यसौभाग्यसम्पत्तिं देहि मामम्ब पार्वति ॥६६॥
मन्त्रेणानेन देवि त्वां पूजयित्वा मया सह ॥
कथां श्रुत्वा विधानेन दद्यादन्नं च भूरिशः ॥६७॥

पूजा गरेर विधानपूर्वक कथा सुनेर बहुत अन्न, ॥ ६७ ॥ यथाशक्ति वस्त्र, सुवर्ण ब्राह्मणलाई दिनू, अरु ब्राह्मणहरूलाई र सौभाग्यवती स्त्रीहरूलाई

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पनि भूषणहरू दिई ॥ ६८ ॥ हे देवी ! आफ्ना पतिले सहित भक्ति-पूर्वक कथा सुनेर (व्रतेश्वर) अर्थात् व्रतहरूमा श्रेष्ठ भएको यो व्रत गर्नाले सम्पूर्ण पापदेखि मोक्ष भएर ॥ ६९ ॥ त्यो सात जन्मसम्म राजसी ऐश्वर्य

ब्राह्मणेभ्यो यथाशक्त्या देया वस्त्रहिरण्यगाः ॥
अन्येभ्यो दीयते भूरि स्त्रीणां वा भूषणादिकम् ॥६८॥
भर्त्ता सह कथां श्रुत्वा भक्तियुक्तेन चेतसा ॥
कृत्वा व्रतेश्वरं देवि सर्वपापैः प्रमुच्यते ॥६९॥
सप्तजन्म भवेद् राज्यं सौभाग्यं चैव वर्द्धते ॥
तृतीयायां तु यो नारी आहारं कुरुते यदि ॥७०॥

भोग्दछे र सौभाग्य बढ्दछ अर्थात् सात जन्म सम्म रानी हुन्छे, विधवा पनि हुन्न, यस तृतीयाका दिन जउन स्त्रीले व्रत नगरे [illegible]न्छे ॥ ७० ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सात जन्म सम्म बन्ध्या हुन्छे, जन्म-जन्ममा वैधव्य (विधवा) हुन्छे र दरिद्री, पुत्रशोक, कर्कशा, दुःखिनी भएर रहन्छे ॥ ७१ ॥ जो नारी उपवास गर्दिन त्यो नारी यस्ता प्रकारको दुःख भोग गरेर मरेपछि घोर

सप्तजन्म भवेद् वन्ध्या वैधव्यं जन्मजन्मनि ॥
दारिद्र्यं पुत्रशोकं च कर्कशा दुःखभागिनी ॥७१॥
पच्यते नरके घोरे नोपवासं करोति या ॥
राजते काञ्चने ताम्रे वैणवे चाथ मृण्मये ॥७२॥

नरकमा पर्दछे । यति भनेर पारणको विधि भन्नुहुन्छ, हे देवी ! सुवर्ण, चाँदी, तामा, बाँस, मृत्तिका यतिमा जो सक छ ॥ ७२ ॥ पात्रमा, भरी चामल हालेर वस्त्र, फल दक्षिणाले सहित यस्तो वायन ब्राह्मणलाई दिएर

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तहाँ उपान्त व्रतको पारण अथवा साङ्गे गर्नू ॥ ७३ ॥ यस्ता प्रकारको विधि बताएर फेरि महादेव पार्वतीलाई भन्नुहुन्छ हे पार्वती ! मैले कहेको विधिपूर्वक जुन नारीले यो व्रत गर्दछे त्यो नारी जो छे सो तिमीले तुल्य

भाजने विन्यसेदन्नं सवस्त्रफलदक्षिणम् ॥
वायनं द्विजवर्य्याय दद्यान्ते च पारणम् ॥७३॥
एवं विधिं या कुरुते च नारी त्वया समाना रमते स्वभर्त्रा ॥
भोगाननेकान् भुवि भुज्यमाना सायुज्यमन्ते लभते नरेण ॥७४॥
अश्वमेधसहस्राणि वाजपेयशतानि च ॥
कथा श्रवणमात्रेण तत्फलं प्राप्यते नरैः ॥७५॥

आफ्ना पति संग रमण गरेर अनेक सुख भागी अन्त्यमा आफ्ना पतिले शहित सायुज्य मुक्ति पाउँछे ॥ ७४ ॥ यो कथा सुन्नाले मात्र हजार अश्वमेध यज्ञ, सयौं वाजपेय यज्ञ गरेको जस्तै फल प्राप्त हुन्छ ॥ ७५ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

देवी ! यो उत्तम व्रत तिम्रा अगाडि मैले भन्दो भएँ । यो व्रत कस्तो भने जउन व्रत गर्नाले मात्र कोटि यज्ञ गरेको फल प्राप्त हुन्छ ॥ ७६ ॥ हे देवि ! भनेर महादेवजीले पार्वतीलाई आज्ञा भएको नैमिषारण्यमा

एतत्ते कथितं देवि तवाग्रे व्रतमुत्तमम् ॥
कोटियज्ञकृतं पुण्यं यस्यानुष्ठानमात्रतः ॥७६॥

सूतजीले शौनकादि ८८ हजार ऋषिहरूलाई बताएको यो कथा जो छ सोही कथा यहाँ यथामति विस्तार गरियो ॥

इति भविष्योत्तरपुराणे हरितालिकाव्रतकथा समाप्ता

पुस्तक पाइने ठेगाना—
बाबू माधवप्रसाद शर्मा
११६, दूधविनायक, वाराणसी-१

मुद्रक—सूरज प्रसाद गुप्त, राजेश्वर प्रिंटिंग वर्क्स, त्रिलोचनघाट, वाराणसी ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

❀ इति ❀

हरितालिका व्रतकथा विधि

बाबू माधवप्रसाद शर्मा

वाराणसी-१

❀

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

This PDF you are browsing is in a series of several scanned documents containing the personal colleciton of Jagannath Bhattarai ji from Kathmandu, Nepal.

CV:

Jagannath Bhattarai
Date of Birth: 31 December 1960
Place of Birth: Kathmandu, Nepal
Address: Nagarjun (Ramkot), Kathmandu

Educational Qualifications
Bachelor of Science (B.Sc.) – Major in Biology
Master's Degree – Sociology & Anthropology
Shastri (Ongoing) – Balmiki Vidyapeeth

Professional Experience
Government School Teacher (Madhyamik Pratham Shreni)
Taught at Secondary Level (Madhyamik)
Taught at Higher Secondary Level (Uchcha Madhyamik)
Served as Head Teacher
Led academic and administrative development
Strengthened institutional performance and student outcomes

Areas of Interest
Sanskrit Vyakaran
Spiritual & Philosophical Studies
Educational Leadership

Digitization by eGangotri Trust
Funding by MIDF, New Delhi